शार्व्वरं, क्ली, अन्धतमसम्। घातुके, त्रि। इति मेदिनी॥ (शर्व्वर्य्या इदम्। शर्व्वरी+अण्।) शर्व्वरीसम्बन्धिनि, त्रि॥

शर्व्वरी, स्त्री, रात्रिः। इत्यमरटीकायां भरतधृतवाचस्पतिः॥

शाल, ङ ऋ कत्थने। इति कविकल्पद्रुमः॥(भ्वा०-आत्म०-सक०-सेट्।) कत्थने प्रशंसायाम्। ङ, शालते गुणिनं गुणी। ऋ, अशशालत्। इति दुर्गादासः।

शाल, पुं, (शल्यते प्रशंस्यते इति। शाल+घञ्।) मत्स्यभेदः। शजाड़ इति ख्यातः। प्राकारः। वृक्षविशेषः। तत्पर्य्यायः। सर्जः २ कार्श्यः ३ अश्वकर्णकः ४ शस्यसम्बरः ५। इत्यमरः॥ शङ्कुवृक्षः ६। इति रत्नमाला॥ नदभेदः। इति शब्दरत्नावली॥ शालनृपः। स तु शालिवाहनराजः। इति विश्वः॥ वृक्षमात्रम्। इति राजनिर्घण्टः॥*॥ शालो भषे धीवर एव दाम इत्युष्मभेदात्तालव्यादिः। दन्त्यादिश्च। कैवर्त्त इव बहुराजीवोत्पलशालो वसन्तकाल आजगाम। इति वासवदत्ताश्लेषात्। कैवर्त्तपक्षे सालो मत्स्यविशेषः। वसन्तपक्षे सालस्य पुष्पं सालम्। इति भरतः॥

शालग्रामः, पुं, विष्णुमूर्त्तिविशेषः। स च गण्डक्युद्भववज्रकीटकृतचक्रयुक्तशिला द्वारकोद्भवनाट्यशिला च। तस्य माहात्म्यलक्षणादि यथा,—

"प्रसङ्गात् कथयिष्यामि शालग्रामशिलार्च्चनम्
निष्कामो मुक्तिमाप्नोति मूर्त्तिं ध्यायन् स्तुवन् जपन्॥
शङ्खचक्रगदापद्मं केशवाख्यो गदाधरः।
साब्जकौमोदकीचक्रशङ्खी नारायणो विभुः॥
स च शङ्खाब्जपद्मो माधवः श्रीगदाधरः।
गदाब्जशङ्खचक्री वा गोविन्दाख्यो गदाधरः॥
पद्मशङ्खादिगदिने विष्णुशङ्खाय वै नमः।
सशङ्खाब्जगदाचक्रमधुसूदनमूर्त्तये॥
नमो गदासिचक्राब्जयुक्तत्रिविक्रमाय च।
साविकौमोदकीपद्मशङ्खवामनमूर्त्तये॥
शङ्खाब्जचक्रगदिने नमः श्रीधरमूर्त्तये।
हृषीकेश साविगदाशङ्खपद्मिन्नमोऽस्तु ते॥
साब्जशङ्खगदाचक्रपद्मनाभस्वरूपिणे।
दामोदर शङ्खगदाचक्रपद्मिन्नमोऽस्तु ते॥
साविशङ्खगदाब्जाय वासुदेव नमो नमः।
शङ्खाब्जचक्रगदिने नमः सङ्कर्षणाय च॥
शङ्खचक्रगदाब्जाय धृतप्रद्युम्नमूर्त्तये।
नमोऽनिरुद्धाय गदाशङ्खाब्जवरधारिणे॥
साब्जशङ्खगदाचक्रपुरुषोत्तममूर्त्तये।
नमोऽधोक्षजरूपाय गदाशङ्खविधारिणे॥
नृसिंहमूर्त्तये पद्मगदाशङ्खविधारिणे।
पद्मारिशङ्खगदिने नमोऽस्त्वच्युतमूर्त्तये॥
सशङ्खचक्राब्जगदं जनार्द्दनमिहो नमः।
उपेन्द्रं गदिनं साविपद्मशङ्ख नमोऽस्तु ते।
सचक्राब्जगदाशङ्खयुताय हरिमूर्त्तये।
सगदाब्जारिशङ्खाय नमः श्रीकृष्णमूर्त्तये॥
शालग्रामशिलाद्वारगतलग्नद्विचक्रधृक्।
शुक्लाभाख्यश्च सोऽव्याद्वः सदैव श्रीगदाधरः॥
लग्नद्विचक्री चक्राभः पूर्व्वभागस्तु पुष्कलः।
सङ्कर्षणोऽथ प्रद्युम्नः सूक्ष्मचक्रस्तु पीतकः॥
स दीर्घः स शिरश्छिद्रो योऽनिरुद्धस्तु वर्त्तुलः।
नानाद्वारद्विरेखश्च अथ नारायणोऽसितः॥
मध्ये गदाकृता रेखा नाभिपद्ममहोन्नतः।
पृथुचक्रो नृसिंहो वः कपिलोऽव्यात्त्रिबिन्दुकः॥
अथवा पञ्चबिन्दुस्तत्पूजनं ब्रह्मचारिणः।
वराहशक्तिलिङ्गोऽव्याद्विषमद्वयचक्रकः॥
नीलस्त्रिरेखः स्थूलोऽथ कूर्म्ममूर्त्तिः स्वबिन्दुमान्।
कृष्णः सवर्त्तुलावर्त्तः पाण्डरोन्नतपृष्ठकः॥
श्रीधरः पञ्चरेखोऽव्याद्वनमालागदाङ्कितः।
वामनो वर्त्तुलो नाम वामचक्रः सुरेश्वरः॥
नानावर्णोऽनेकमूर्त्तिर्नागभोगी त्वनन्तकः।
स्थूलो दामोदरो नीलो मध्ये चक्रः सुनीलकः॥
संकीर्णद्वारको वोऽव्यादथ ब्रह्मा सुमोहितः।
सदीर्घरेखा शुषिर एकचक्राम्बुजः पृथुः॥
प्रत्युच्छिद्रः स्थूलचक्रः कृष्णोऽबिन्दुश्च बिन्दुमत्।
हयग्रीवोऽङ्कुशाकारः पञ्चरेखः समन्ततः॥
वैकुण्ठोऽमलवद्भाति एकचक्रात्मकोऽसितः।
मत्स्यो दीर्घाम्बुजाकारो द्वाररेखस्तु पाण्डरः॥
वामचक्रो दक्षरेखः श्यामो वोऽव्यात्त्रिविक्रमः
शालग्रामे द्वारकायां स्थिताय गदिने नमः॥
एकेन लक्षितो वोऽव्याद्गदाधारी सुदर्शनः।
लक्ष्मीनारायणो द्वाभ्यां त्रिभिर्मूर्त्तिस्त्रिविक्रमः॥
चतुर्भिश्च चतुर्व्यूहो वासुदेवश्च पञ्चभिः।
प्रद्युम्नः षड्भिरेवाव्यात् सङ्कर्षण इतः स्तुतः॥
पुरुषोत्तमोऽष्टभिः स्याच्च नवव्यूहो नवान्वितः।
दशावतारो दशभिरनिरुद्धोऽवतादथ।
द्वादशात्मा द्वादशभिरत ऊर्द्ध्वं ह्यनन्तकः॥"

इति पाद्मे पातालखण्डे १० अध्यायः॥

अपि च।

ईश्वर उवाच।

"शालग्रामे मणौ यन्त्रे मण्डले प्रतिमासु च।
नित्यन्तु श्रीहरेः पूजा केवलेन जलेन तु॥
गण्डक्यामेकदेशे तु शालग्रामस्थलं महत्।
पाषाणान्तर्भवं यत्तत् शालग्राममिति स्थितम्॥
शालग्रामशिलास्पर्शात् कोटिजन्माघनाशनम्।
किं पुनर्जननं तत्र हरेः सान्निध्यकारणम्॥
शालग्रामैकयजनात् शतलिङ्गफलं लभेत्।
बहुभिर्जन्मभिः पुण्यैर्यदि कृष्णशिलां लभेत्॥
गोष्पदेन च चिह्नेन तेन वै त्रायते नरः।
आदौ शिलां परीक्षेत स्निग्धां श्रेष्ठाञ्च मेचकाम्॥
अकृष्णा मध्यमा प्रोक्ता मिश्रा मिश्रफलप्रदा।
सर्व्वकामप्रदा सौम्या कराला भयदुःखदा॥
स्निग्धा च श्रीकरी नित्यं रूक्षा दारिद्र्यदायिका।
क्षुद्रा क्षुद्रफला प्रोक्ता स्थूला स्थूलफलप्रदा॥
यदा काष्ठे स्थितो वह्निर्मन्थने च प्रकाशते।
यथा तथा हरिर्व्यापी शालग्रामे प्रकाशते॥
प्रत्यहं द्वादश शिलाः शालग्रामस्य योऽर्च्चयेत्
द्वारवत्याः शिलायुक्ताः स वैकुण्ठे महीयते॥
शालग्रामशिलायान्तु गह्वरं लक्ष्यते नरः।
पितरस्तस्य तिष्ठन्ति तृप्ताः कल्पान्तरं दिवि॥
शालग्रामशिला यत्र यत्र द्वारवती शिला।
मृते विष्णुपुरं याति कृतार्थं योजनत्रयम्॥
जपपूजा च होमश्च सर्व्वं कोटिगुणं भवेत्।
मनस्कामः सदाभीष्टं क्रोशमात्रं समन्ततः॥
कीकटेऽपि मृतो याति वैकुण्ठभवनं नरः।
शालग्रामशिलायां यो मूल्यमुत्पादयेन्नरः॥
विक्रेता चानुमन्ता च यः परीक्षानुमोदकः।
सर्व्वे ते नरकं यान्ति यावदाहूतसंप्लवम्।
अतस्तं वर्ज्जयेद्देवि! हरिविक्रयणक्रमम्।
शालग्रामोद्भवो देवो यो देवो द्वारकोद्भवः।
उभयोः सङ्गमो यत्र मुक्तिस्तत्र न संशयः॥
द्वारकोद्भवः शुक्लश्च बहुचक्रेण चिह्नितः।
चक्रमासीत् शिवाकारचित्स्वरूपनिरञ्जनम्॥
नमोऽस्त्वोङ्काररूपाय सदानन्दस्वरूपिणे।
शालग्रामे महाभाग भक्तस्यानुग्रहं कुरु।
त्वया युतस्य धर्म्मस्य ऋणग्रस्तस्य मे प्रभो॥"

इति तत्रैव ११ अध्यायः

अपरञ्च।

ब्राह्मण उवाच।

"गण्डकीयं नदी राजन्! सुरासुरनिषेविता।
पुण्योदकपरीवाहैर्हतपातकसञ्चया॥
दर्शनान्मानसं पापं स्पर्शनात् कर्म्मजं दहेत्।
वाचिकं स्वीयतोयस्य पानतः पापसञ्चयम्॥
पुरा दुष्टाः प्रजा नाथः प्रजाःसर्व्वा विपाप्मनः।
स्वगण्डाद्विप्रषोऽनेकपापघ्नीं सृष्टवानिमाम्॥
एनां नदीं ये पुण्योदां स्पृशन्ति सुतरङ्गिणीम्।
ते गर्भभाजो नैव स्युरपि पापकृतो नराः॥
तस्यां भवा ये चाश्मनश्चक्रचिह्नैरलङ्कृताः।
ते साक्षाद्भगवन्तो हि स्वस्वरूपधराः पराः॥
शिलाः संपूजयेद्यस्तु नित्यं चक्रयुताः सदा।
न जातुचिज्जनन्या वै जठरं समुपाविशेत्॥
पूजयेद् यो नरो धीमान् शालग्रामशिलां वराम्।
तेनाचारवता भाव्यं दम्भमोहवियोगिना॥
परदारपरद्रव्यविमुखेन नरेण च।
पूजनीयः प्रयत्नेन शालग्रामः सचक्रकः॥
द्वारवत्या भवं चक्रं शिला वै गण्डकीभवा।
पुंसां क्षणाद्धरन्त्येव पापं जन्मशतार्ज्जितम्॥
अपि पापसहस्राणां कर्त्ता तावन्नरो भवेत्।
शालग्रामशिला आपः पीत्वा पूयेत तत्क्षणात्॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वेदपथे स्थितः।
शालग्रामं पूजयित्वा गृहस्थो मोक्षमाप्नुयात्॥
न कदाचित् स्त्रिया कार्य्यं शालग्रामस्य पूजनम्
भर्त्तृहीनाथ सुभगा सर्व्वलोकहितैषया॥
मोहात् स्पृशेत महिला जन्मशीलगुणान्विता।
हित्वा पुण्यसमूहन्तु सत्वरं नरकं व्रजेत्॥
स्त्रीपाणिमुक्तपुष्पाणि शालग्रामशिलोपरि।